Digitized by Arya Samaj Foundation Chennai and eGangotri

AS 209

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

* ओ३म् *

गुरुकुल ग्रन्थावलिः

महाकवि कालिदास प्रणीत—

रघुवंशीयाद्य सर्गत्रयम्।

मूलमात्रम्।

मुख्याधिष्ठातुराज्ञानुसारम्

813,348
33824

गुरुकुलीय यन्त्रालये

श्री लाला नन्दलालप्रबन्धेन मुद्रितम्

{ प्रथमावृत्तिः १००० प्रति } संवत् १९७१ { मूल्य ...।।)}

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ओ३म् ॥

गुरुकुलीय साहित्य परिषदः सकाशात्पूर्वं प्रकाशितानां ग्रन्थानां विज्ञापनम्

		मूल्यम्
[१]	प्रथम वार्षिक वृत्तान्तम्	=)
[२]	द्वितीय ,, ,,	≡)
[३]	तृतीय ,, ,,	।-)
[४]	चतुर्थ ,, ,,	॥)
[५]	मांसमीमांसा [आर्य्यभाषा]	।)
६	वैदिक देवतास्वरूप ,,	≡)
७	वैदिक रोगजन्तु शास्त्र ,,	-)॥
८	संस्कृतसाहित्यं तत्समालोचकाश्च	यन्त्रस्थाः
९	वेदस्थानादित्वम् [आर्य्यभाषा]	,,
१०	भारतीयशिक्षादर्श [आर्य्यभाषा]	

मन्त्री साहित्य परिषद्

गुरुकुल काङ्गड़ी, हरिद्वार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी
COMPILED
ऋते ज्ञानान्न मुक्तिः
पुस्तक सं० 10.21/द (व)
आगत सं० 4.2.5
तिथि० 9-2-2009
गुरुकुल ग्रन्थालय कांगड़ी
CHECKED 1973
Initial

ओ३म्

प्रस्तावना

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥
वाणः

कविकुलचूडामणेः कालिदासस्य लघुत्रयीं प्रायः सर्वोऽपि विदग्धो जनः संस्कृतसाहितीरसं विन्दानो जानाति, यत् केवलमियं भारतीयानामेव कविभणिति प्रणयिनां हृदयानि न संमोहयति परं विदेशीयानामपि मनांसि भूयो भूयो रोचयत्येव । तस्यैवाध्ययनाध्यापनस्य प्रक्रमः प्रायः सर्वत्र भारते इदानीं प्रवर्तते सर्वस्यापि ग्रन्थस्य पठनं विहाय वटवः प्रायः सर्गत्रयमेव गुरुमुखात्पठन्ति यतो हि स्वल्पा विनयवृत्त्याऽधिगता विद्या महतीं फलमालां प्रसूते अतएवेदं नवीनं संस्करणमपि रघुवंशस्य आद्यसर्गत्रयात्मकं सर्वसाधारणस्य विद्याप्रणयिनो वटोरुपयोगायाऽस्माभिः पृथगेव मुद्रयते यतः सर्वस्य ग्रन्थस्यादाने शिष्यजनस्य अर्थदृष्ट्याऽपि महान्प्रयासो न स्यात् । पुस्तकस्य चरमे भागे विद्यार्थिभ्य उपयोगिनी टिप्पण्यपि टीकाग्रन्थेभ्यः समुद्धृत्य संवेशिता यतः दुरधिगमं

813,348
93824
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरलतयैव हृगदयंगमं स्यात् । सम्पूर्णायाष्टीकाया विलोपे इदमेव प्रयोजनं साधीयः पश्यामो यद्विद्यार्थिनः स्वयमपि पद्यस्य मर्म भेत्तुं पारयेयुः; यथासमयं चोचितं साहाय्यमुपलभेरन् ।

सहैव च टिप्पण्या प्रतिसर्गमनु कतिचन प्रश्ना अपि समुपन्यस्ताः सन्ति, यदनुसारमुपाध्यायाः शिष्यान् गद्य पद्यात्मकान्प्रस्तावान्लेखितुं प्रेरयेयुः । एवमेव च ग्रन्थस्य तत्वमपि विशदं भवति । यथा दधि स्वयंमथितं स्वयमालोडितं स्वयं सेचितं नवं नवनीतं सुस्वादु जनयति आनन्दञ्च तथैवेदं स्वयं परिश्रमेणाप्तं तत्वं मनोहारि विद्याधिगमं जनयिष्यति ।

कालिदासः

अयं कविः कं कालमलंचकारकाञ्चदेशभूमि मुज्ज्वलयामास कयोश्च नरदेहधारिणोः रुत्सङ्गं सफलयामासेति बहुविधाः प्रवादाः समुपलभ्यन्ते विदुषाम् । अधुनावधि अस्य निर्णयो दुःशक इतिहासविदाम् ।

कति कालिदासा अभूवन्नित्यत्राऽपि अस्त्येव विदुषां विप्रतिपत्तिः । यथा यवनराज्यस्यैकतमस्य भूपतेरकबरस्य वीरवरेण प्रतिपन्नधिया साकं यथा अस्त्येव कश्चिच्छाश्वतः सम्बन्धो जनसंसदि, तथैवाऽस्माकं भोजनृपतेरपि विद्वत्प्रणयिनोऽस्त्येव सिद्धसार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतेन कालिदासेन सह शाश्वतं सख्यम् । यथा भोजप्रबन्धकारः इदमधिकृत्यैव स्वप्रबन्धं वितेने । अन्येच, यथा धृत वसुमतीधुरो वीरवर्यस्य पृथ्वीराजस्य चन्द्रकविरभूत्तथैव वीरस्य विक्रमस्या दित्यपदलाञ्छनस्याभूदेव कालिदासनामधेयः कविचक्रमुकुटालं कारभूतः इति च प्राहुः ।

प्रथमस्योपक्रमस्य भोजप्रबन्धमन्तरा न वयं किमपि प्रमाणा-न्तरमुपलभामहे । नवा कालिदासस्यैव काचिद्वर्णमाला तस्य भोज भूपसंसदोलंकारभूतत्वं शंसति, नाप्यन्यस्य कस्यचित्प्रवृत्तवाचः कवेरेव भणितिः परिस्फुरति ।

विक्रमस्य कालिदासेन सह सम्बन्धस्तु तस्यैव नाटकाना मामुखतो विशदीभवति, नतमां तत्र संदेह लेशोऽपि । अस्यकवेः पितृविषयकं न किमपि वार्त्तामुपलभ्यते । अथाऽन्ये कवयः आत्मनः कुलं परिचायन्तः ग्रन्थारम्भे बाणवत्, ग्रन्थान्ते माघभारविवत्, नाटकानां आमुखे जयदेवादिवत्, स्वकुल शंसनं वितन्वन्ति; नतथाऽयं क्वापि स्वजनि मुपन्यस्यति अतएवायं महान् संश-यास्पदः ।

तथाऽप्येका गाथा उपलभ्यते भोजसमकालीनस्य कालिदा-सस्य विषये सा चात्र बटूनां विनोदायोपन्यस्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"विद्वत्प्रणयिनो भोजस्य कन्यकाया उद्वाहवेलेयमुपस्थिता। वरान्वेषणाय प्रधानामात्यपुत्रः कमनीयं प्रस्तुतसकलसामग्रीकं रथमारूढो देशान्तरं प्रतस्थे। प्रधानामात्यपुत्रस्य युवराजेन भोजेन सहपूर्वमेवाऽऽसीद्धास्यहेतुभूतः कश्चिद्विनोदः। इति केवलं परिहासस्य कृते प्रधानामात्यपुत्रः कमपि मूर्खमनभिज्ञं वरं विचेतुं प्रयेते। स च गच्छन्कस्य चिद् ग्रामस्य परिसरे महान्तमुच्छ्रितं तरुमेकमारूढं गोपालकयुवकमात्मनः आधारभूतामेव शाखां ब्रश्चन्तमद्राक्षीत्। दृष्ट्वा च तमेव योग्यं वरं विचिन्वन्, तमाहूय "राज्ञः कन्यकया सह ते परिणयो भवितेति" प्रलोभ्य रथमारोप्य शीघ्रमेव "समागतो वरः, सुखेन राजगृहे सत्कार्य" इति राजसद्मनि सूचयित्वा तं गोपालकयुवकं चित्रिततूलिकामये पर्यङ्केऽशाययत् सोऽपि अपूर्वं निद्रासुखम्भजमानः राजशयनेऽपरेद्युरपि चिरं सुष्वाप। प्रातः राजकुमारी प्रणयवशाद्वरमवलोकयति यावत्तु तं कमपि ग्रामीणं युवानमासद्य पूर्वं लज्जापन्नाऽपि निगूढान् गुणान् संभाव्य शनकैरुदबोधयत्। सचोद्बुद्धो यावदक्षिणी प्रमृज्यावलोकयति कन्यकां, तावदति भीतभीतश्चकितचकितः, जवादुत्थाय शयनादवतीर्य, राजतनयया आश्वस्तः, क्रमेण गृहभित्तौ लम्बमानानि चित्राणि द्रष्टुमारभत।,,

"सर्वाण्यपि चित्राणि अपरिचितानीव तस्य नैव हृदयं स्मापयन्ति। यावद् गवां वृन्दं चारयन्तं वसुदेवसुनुं नीलाम्बुदश्यामल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेकस्मिंश्चित्रे पश्यति तद्दृष्ट्वैवाभूदेवोत्फुल्लं तस्य मनः; इदं विलोक्य राजकन्याऽपि तस्य क्षुद्रं जन्म विभाव्य तं सत्त्रासं विद्यालाभाय निर्भर्त्स्य निरकासयत् ।,,

"स चाऽपिमूढः यथोपदेशं तस्माद् गृहात्खिन्नः एकस्याति प्रसिद्धस्य गुरोश्चरणावुपसिषेवे । गुरुश्च तम्भविष्यति गुणसमृद्धमवलोक्य चिन्तामणिमन्त्र मुपदिदेश । सोऽपि एकस्य तड़ागस्य तटे प्रवृत्तासनः संयतः मन्त्राक्षराणि जजाप । एवं कालेन आक्षविद्यः पुनरपि राजकुमार्याः गृहस्य कपाटावुद्घाटयितुं संकेत मकरोत् ।,,

"राजतनया च "अस्ति कश्चिद्वाग्विशेष" इत्युक्त्वा तं सादर मात्मनः पतिं विद्याधिदेवतया पवित्रित मङ्गीकृत्य सुखेन कालं निनाय । तत आरभ्य एव कालिदासः कविकुलकुन्तलालंकारतां जगति भेज इति ।,,

आत्मनः धर्मदाराणामेव प्रतिपदमारभ्यैकैकं काव्यं जग्रन्थेति प्रसिद्धि रधुनाऽपि कर्णातिथी भवति ।

यथा कुमारसम्भवम्—अस्त्युत्तरस्यां दिशि देवतात्मा इति । रघुवंशम्—वागर्था विवसंपृक्ताविति मेघदूतम्—कश्चित् कान्ता.....इति । इदमेव काव्यत्रयं कालिदासस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुत्रय्यां समाविशति अत्र पूर्वोक्ते वृत्ते सत्यसत्यानिर्णयस्तु दुष्करो-ध्यवसितुम् । परमेतावताऽपि कालिदासस्याऽप्रसिद्धकुलप्रभवत्वं तु संघटतेऽन्यथातस्याप्यन्येषामिव कुतो नकुलमानः । अथवा किं कुलेनौपाधिकेन; निरुपाधिकमेव सावित्र्याः किल भगवत्याः कुलम्, यदहरहः सिद्धसारस्वतान् वाल्मीकिप्रभृतीन् ऋषीन्, शंकरसदृशानाचार्यान्, कालिदास प्रभृतींश्च कवि मुकुटमणीन् सूते । भारतविश्वंभराऽप्यैतै र्गुणगणगणनीयैः नररत्नसूरिति सार्थकं नाम बिभ्रती राजते इत्यलं विदुषा मग्रे पल्लवितेन ।

प्रकाशकः

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

पृ० पृ०

प्रस्तावना ... ...क—च

प्रथमः सर्गः ... ... १—९

कवेर्विनयः

रघूणांवर्णनम्

दिलीपस्योत्पत्तिः

तस्य वर्णनम्

तस्य राज्यवर्णनम्

तस्य पत्नी

सन्तानाय वसिष्ठाश्रमगमनम्

मार्ग वर्णनम्

आश्रम वर्णनम्

वसिष्ठदिलीपयोरालापः

राज्ञः शापः

वसिष्ठस्य नन्दिनी

नन्दिन्याः सेवोपदेशः

द्वितीयः सर्गः ... ...१०—१६

नन्दिन्याः सेवा

वनविचरणम्

राज्ञ स्तपः

केसरिण आविर्भावः

राज्ञः स्तम्भः

मृगेन्द्र राजेन्द्रयो रालापाः

दिलीपस्य स्वार्पणम्

नन्दिन्या मायाविलोपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दिन्याः वरप्रदानम्
पत्न्या गर्भः
तृतीयः सर्गः १७–२२
रघोरुत्पत्तिः
जन्मोत्सवः
नामकरणम्
बालजीवनम्
बालशिक्षा
विवाहः
रघोर्वर्णनम्
तस्य यौवराज्यम्
दिलीपस्य क्रतुः
इन्द्रेणाश्वापहारः
नन्दिन्या आगमनम्
रघोर्दिव्य चक्षुष्मत्ता
इन्द्ररघ्वोः संवादः
इन्द्ररघ्वोः संग्रामः
इन्द्रस्य प्रसादः
रघौ राज्यारोपः
टिप्पणी—
प्रथमः सर्गः २५–
प्रश्नाः
द्वितीयः सर्गः
प्रश्नाः
तृतीयः सर्गः
प्रश्नाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

१. 'उडुपं तु ध्रुवं कालं' इत्यमरः। २. दारेष्वपि गृहाः। इत्यमरः।
३. 'शिशुत्वं शैशवं बाल्यम्' इत्यमरः।

Digitized by Arya Samaj Foundation Chennai and eGangotri

* ओ३म् *

रघुवंशम् ।

प्रथमः सर्गः ।

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ २ ॥
मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥ ३ ॥
अथवा कृतवाग्द्वारे वंशे ऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥
सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥
त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७ ॥
शैशवे ऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ ८ ॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवो ऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ 'छन्दः पद्ये च वेदे च' इति विश्वः। २ 'व्यूढं विपुलं भद्रं स्फारं समं वरिष्ठं च' इति यादवः।

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥
वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११ ॥
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुःक्षीरनिधाविव ॥ १२ ॥
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३ ॥
सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ १४ ॥
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥ १५ ॥
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥
रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥ १७ ॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ १८ ॥
सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ॥ १९ ॥
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥ २० ॥
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ॥ २१ ॥

३ 'आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि' इति विश्वः। ४ 'यादांसि जलजन्तवः' इत्यमरः। ५ 'क्षुण्णादा प्रथितेर्मितेः' इति यादवः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. वेला : समुद्रस्य तीरे वेलेव भूलोऽपि वारिधेः ' इति विश्वः।
२. रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी यूत्मरः।

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥ २२ ॥
अनाकृष्टस्य विषयै र्विद्यानां पारदृश्वनः ।
तस्यधर्मरतेरासी द्वृद्धत्वं जरसा विना ॥ २३ ॥
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥
स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ २५ ॥
दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ २६ ॥
न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥ २७ ॥
द्वेष्यो ऽपि संमतः शिष्ट स्तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टःप्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥ २८ ॥
तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्वे तस्यासन्परार्थैकफला गुणाः ॥ २९ ॥
स वेलावप्रबलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥ ३० ॥
तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ ३१ ॥
कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥ ३२ ॥
तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥ ३३ ॥

३. कलत्रं स्त्रीभार्ययोः इत्यमरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. शालः सर्जतरुः स्मृतः इति शाश्वतः।

संतानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ॥ ३४ ॥
अथाभ्यर्च्य विधातारं प्रययौ पुत्रकाम्यया ।
तौ दंपती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ॥ ३५ ॥
स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥ ३६ ॥
मा भूदाश्रमपीडेति परिमेयपुरःसरौ ।
अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७ ॥
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥ ३८ ॥
मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधाभिन्नाः शिखण्डिभिः ॥ ३९ ॥
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥ ४० ॥
श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥४१ ॥
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥ ४२ ॥
सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम् ॥ ४३ ॥
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥ ४४ ॥
हैयंगवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ मन्यानां मार्गशाखिनाम् ॥ ४५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः ।

विषय संख्या 293/382
आगत पंजिका संख्या 33228
पुस्तकालय
गुरुकुल कांगडी विश्वविद्यालय
25 OCT 1971
D/18/29

॥ ॥ ॥१ ॥

अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ५६ ॥
तयोर्जगृहतुः पादान्राजा राज्ञीच मागधी ।
तौ गुरुगुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ ५७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ 'शालः सर्जतरुः स्मृतः' इति शाश्वतः ।

३४ ॥
।
३५ ॥
।
६ ॥
७ ॥
मः ।
८ ॥
ः ।
ण्डिभिः ॥ ३९ ॥
४० ॥
म् ।
॥४१ ॥
४२ ॥
।
आमोदमुपाजिघ्रन्तौ स्वानःश्वासानुकारिणम् ॥ ४३ ॥
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥ ४४ ॥
हैयंगवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥ ४५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ ४६ ॥
तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥ ४७ ॥
स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥ ४८ ॥
वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥ ४९ ॥
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥ ५० ॥
सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहंगानामालवालाम्बुपायिनाम् ॥ ५१ ॥
आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥ ५२ ॥
अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥ ५३ ॥
अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।
तामवारोहयत्पत्नीं रथादवततार च ॥ ५४ ॥
तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५५ ॥
विधेः सायंतनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥ ५६ ॥
तयोर्जगृहतुः पादान्राजा राज्ञीच मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ ५७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥५८॥
अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ॥ ५९ ॥
उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदाम् ॥ ६० ॥
तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥ ६१ ॥
हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ॥ ६२ ॥
पुरुषायुषजीविन्यो निरातङ्काः निरीतयः ।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ॥ ६३ ॥
त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ॥ ६४ ॥
किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
नं मामवति सद्वीपा रत्नसूरपि मेदिनी ॥ ६५ ॥
नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥ ६६ ॥
मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।
पयः पूर्वैः सनिःश्वासैः कवोष्णमुपभुज्यते ॥ ६७ ॥
सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्चलोकालोक इवाचलः ॥ ६८ ॥
लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ ६९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ॥ ७० ॥
असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः ॥ ७१ ॥
तस्मान्मुच्ये यथा तात संविधातुं तथार्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥ ७२ ॥
इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रं मुनिस्तस्थौ सुप्तमीन इव ह्रदः ॥ ७३ ॥
सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्तुरथैनंप्रत्यबोधयत् ॥ ७४ ॥
पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।
आसीत्कल्पतरूच्छायामाश्रिता सुरभिः पथि ॥ ७५ ॥
धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन् ।
प्रदक्षिणक्रियार्हायां तस्यांत्वं साधु नाचरः ॥ ७६ ॥
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेतित्वां शशाप सा ॥ ७७ ॥
स शापो न त्वया राजन्न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ॥ ७८ ॥
ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ७९ ॥
हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजंगपिहितद्वारं पातालमधितिष्ठति ॥ ८० ॥
सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥ ८१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनीनाम धेनुरावर्तते वनात् ॥ ८२ ॥
ललाटोदयमाशुभ्रं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं संध्येव शशिनं नवम् ॥ ८३ ॥
भुवं कोष्णेन कुण्डोघ्नी मेध्येनावभृथादपि ।
प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥ ८४ ॥
रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ॥ ८५ ॥
तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥ ८६ ॥
अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ ८७ ॥
वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनेव प्रसादयितुमर्हसि ॥ ८८ ॥
प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ॥ ८९ ॥
वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ॥ ९० ॥
इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ॥ ९१ ॥
तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ॥ ९२ ॥
अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्सस्रष्टुर्विससर्जोदितश्रियम् ॥ ९३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यामपि तपः सिद्धौ नियमापेक्षया मुनिः ।
कल्पवित्कल्पयामास वन्यामेवास्य संविधाम् ॥ ९४ ॥
निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ॥ ९५ ॥

इति प्रथमः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयः सर्गः ।

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥
तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥ २ ॥
निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥ ३ ॥
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥४॥
आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥ ५ ॥
स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥ ६ ॥
स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥ ७ ॥
लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान्निनेष्यन्निव दुष्टसत्त्वान् ॥ ८ ॥
विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥ ९ ॥
मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम् ।
अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥ १० ॥
धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुराप्तुरक्षणां प्रकामविस्तारफलं हरिण्यः ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥ १२ ॥
पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥१३ ॥
शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने ॥ १४ ॥
संचारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभापतङ्गस्य मुनेश्च धेनुः ॥ १५ ॥
तां देवतापितृतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥१६॥
स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥१७॥
आपीनभारोद्वहनप्रयत्नाद्दृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः ।
उभावलंचक्रतुरञ्चिताभ्यां तपोवनादृत्तिपथं गताभ्याम् ॥ १८ ॥
वशिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥१९॥
पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या ॥ २० ॥
प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥ २१ ॥
वत्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि ॥ २२ ॥
गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ २४ ॥
इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥२५॥
अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥
सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥२७॥
तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ॥२८॥
स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ २९ ॥
ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥ ३० ॥
वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥ ३१ ॥
बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥ ३२ ॥
तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥३३॥
अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मारुतस्य ॥ ३४ ॥
कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किंकरमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥ ३५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥३६॥
कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥ ३७ ॥
तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ॥ ३८ ॥
तस्यात्मभेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥ ३९ ॥
स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥४०॥
इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥४१ ॥
प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२ ॥
संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ॥४३॥
मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥ ४४ ॥
स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥४५॥
अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्याथपतिं बभाषे ॥४६॥
एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥४७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥ ४८ ॥
अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोघ्नीः ॥४९॥
तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥ ५० ॥
एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥ ५१ ॥
निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदभ्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥
क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥ ५३ ॥
कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु गृहतं त्वयास्याम् ॥ ५४ ॥
सेयं स्वदेहापणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवत्रं भवेदलुप्तश्च मुनेः क्रियाथः ॥ ५५ ॥
भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥ ५६ ॥
किमप्यहिंस्यस्तव चेन्मतोऽहं यशः शरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खल भौतिकेषु ॥५७॥
संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते ।
तद्भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ॥५८॥
तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स न्यस्तशस्त्रो हरये स्वदेह मुपानयत्पिण्डमिवामिषस्य ॥५९॥
तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥ ६० ॥
उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वांगामग्रतः प्रस्रविणीं न सिंहम् ॥६१॥
तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयिनान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥६२॥
भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥६३॥
ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ॥६४॥
संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥६५॥
वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥६६॥
इत्थंक्षितीशेन वशिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥ ६७ ॥
तस्याःप्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥६८॥
स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वशिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥६९॥
प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।
तौदंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वशिष्ठः ॥७०॥
प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ॥७१॥
श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ।
ययावनुद्धातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥७२॥
तं माहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ॥७३॥
पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजंगेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ॥७४॥

अथ नयनसमुत्थंज्योतिरत्रेरिव द्यौः
सुरसरिदिवतेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गरुभिरभिनिविष्टं लोकपालानुभावः ॥७५॥

इति द्वितीयः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः सर्गः ।

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीसुखम्
निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं दधौ ॥ १ ॥
ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदम् ।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम् ॥२॥
दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥३॥
अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥ ४ ॥
जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम् ।
अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥ ५ ॥
निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि ॥ ६ ॥
स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥ ७ ॥
सुखश्रवा मङ्गलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः पथि व्यजृम्भन्त दिवौकसामपि ॥ ८ ॥
न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ।
ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥९॥
श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ॥१०॥
पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥ ११ ॥
उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरंदरौ ।
तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ॥१२॥
रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत ॥ १३ ॥
उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥१४॥
तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ ॥ १५ ॥
अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयम् ।
स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः ॥१६॥
स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥ १७ ॥
अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥१८॥
धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ।
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ॥१९॥
त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ॥ २० ॥
महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव ।
रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गाम्भीर्यमनोहरं वपुः ॥ २१ ॥
अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद्गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥ २२ ॥
युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥ २३ ॥
ततः प्रजानां चिरमात्मना धृतां नितान्तगुर्वीं लघयिष्यता धुरम् ।
निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ॥२४॥
नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम् ।
अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ॥२५॥
विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ।
बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥ २६ ॥
नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ।
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥ २७ ॥
ततः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः ।
धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥२८॥
विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् ।
वशिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नन्दिनी ॥ २९ ॥
तदङ्गनिस्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः ॥ ३० ॥
स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः ।
पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतम् ॥ ३१ ॥
शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः ।
अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ॥ ३२ ॥
मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे ।
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ॥ ३३ ॥
त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ।
स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदङ्गमायं मघवन्महाक्रतोरमुं तुरंगं प्रतिमोक्तुमर्हसि ।
पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् ॥ ३५ ॥
इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् ।
निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥ ३६ ॥
यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः ।
जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ॥ ३७ ॥
हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।
तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी नहि शब्द एष नः ॥३८॥
अतोऽयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः ।
अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ॥ ३९ ॥
ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता ।
गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृतीभवान् ॥४०॥
स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् ।
अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥ ४१ ॥
रघोरवष्टम्भमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ।
नवाम्बुदानीकमुहूर्तलाञ्छने धनुष्यमोघं समधत्तसायकम् ॥ ४२ ॥
दिलीपसूनोः स बृहद्भुजान्तरं प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितम् ॥ ४३ ॥
हरेः कुमारोऽपि कुमारविक्रमः सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्रत्रविशेषकाङ्किते स्वनामचिह्नं निचखान सायकम् ॥४४॥
जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय गुरुकुल कांगड़ी

चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ॥४५॥
तयोरुपान्तस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥४६॥
अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः॥४७॥
ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्धमुखेन पत्रिणा शरासनज्यामलुनाद्विडौजसः ॥४८॥
स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ ४९ ॥
रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः
निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिःस्वनैः ॥५०॥
तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ॥ ५१ ॥
असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् ।
अवेहि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ॥५२॥
ततो निषङ्गादसमग्रमुद्धृतं सुवर्णपुङ्खद्युतिरञ्जिताङ्गुलिम् ।
नरेन्द्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरम् ॥ ५३ ॥
अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ।
अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम् ॥५४॥
यथा च वृत्तान्तमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः ।
तवैव संदेशहराद्विशांपतिः शृणोति लोकेश तथा विधीयताम् ॥५५॥
तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ॥ ५६ ॥
तमभ्यनन्दत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः
परामृशन्हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥ ५७ ॥
इति क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरम्परामिव ॥ ५८ ॥

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ५९ ॥

इति तृतीयः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

टिप्पणी

प्रथमः सर्गः

इह खलु कविशिरोमणिः कालिदासः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः पर निर्वृतये कान्ता समिततयोपदेश युजे इत्यादि काव्यस्यानेकश्रेयः साधनतां पश्यन् रघुवंशं महा काव्यं करोति वागर्था विति—

प० १ वाक् च अर्थश्चेति द्वन्द्वः। सम्पृक्तौ नित्य सम्बद्धौ। प्रतिपत्तिः ज्ञानं तस्मै। पितरौ मातापितरौ पितामात्रेत्येकशेषः। वन्दे नौमि। पार्वती च परमेश्वरश्चेति तौ। पार्वतीपश्च रमेश्वरश्चेति तौ इत्यन्ये।

प० २ कविः स्वाहंकारं परिहरति—प्रभवत्यस्मादिति प्रभवः कारणम्, सूर्योनाम राजर्षि र्यतः सूर्यकुलस्य उत्पत्तिः। सूर्यः प्रभवः आदिकरण मस्येति विग्रहः। तितीर्षुः तर्त्तुमिच्छुः। उडुपः प्लवो नौका वा। प्रतिपाद्यमहिम्ना च प्रबन्धो हि महत्तरः।

प० ३ मन्दो मूढः। उपहास्यतां गमिष्यामि जना मां मुपहसिष्यन्ति इति भावः। प्रांशु रुन्नतो जन स्तेन लभ्ये फले। उद्बाहुरूर्ध्वबाहुः वामनः खर्वः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ४ कृतं रामायणादिप्रबन्धरूपा या वाक्सैव द्वारं यस्य तस्मिन्। सूरयो विद्वांसो बाल्मिकिप्रभृतयः। वज्रेण समुत्कीर्णे विद्धे। गतिः संचारः।

प० ५ सोहम् वक्ष्ये इत्युत्तरेण नवमेन सम्बन्धः। एतेन निषेकादि सर्वसंस्कारसम्पन्नत्वं, प्रारब्धान्त गामित्वं, चक्रवर्त्तित्वम्, इन्द्रसहचारित्वञ्च रघूणां सूच्यते। नाकः स्वर्गः। वर्त्म मार्गम्। क्षितिः पृथिवी।

प० ६ विधिमनति क्रम्य यथाविधि। कामोऽभिलाषः। चतुर्भिर्विशेषणैर्देवतायजनार्थिसत्कारदण्डधरत्वप्रजापलनसमयजागरूकात्वादीनि विक्षितानि।

प० ७ त्यागो दानम्। सभृतार्थानां संचितधनानाम्। विजिगीषुः विजेतुमिच्छुः। सन्लिटोर्जेरिति कुत्वम्। गृहमेधिनः गृहस्थाः,दारपरिग्रहाः। अतः परोपकारित्वं,सत्यवचनत्वं,यशःपरत्वं पितृणां शुद्धत्वं च विवक्षितानि।

प० ८ शैशवं बाल्यम्। विषयैषिणां भोगं कामयमानानाम्। वार्द्धकं जरठता। तनुः शरीरम्। मुनिवृत्तिः मुनिवत्तपोवृत्तिः।

प० ९ तनुरल्पो वाग्विभवो वाक्सम्पत्तिर्यस्य स चापलं चपलकर्म कर्त्तुं तद्गुणैः कर्णमागत्य प्रचोदितो वक्ष्य इति सम्बन्धः। इति कुलकम्। द्वाभ्यां युगलम् त्रिभिर्विशेषकम् चतुर्भिःपञ्चभिः वा कुलकम्।

प० १० सन्तो विद्वान्सः। सदसतोर्गुणदोषयोर्व्यक्तेर्हेतवः कर्त्तारः। हेम्नः सुवर्णस्य। श्यामिका दोषः, मलम्।

प० ११ मनीषिणो बुद्धिमन्तः। महीक्षिद् राजा। प्रणव ओंकारः। छन्दसांमन्त्रणाम्। विवस्वतः सूर्यस्य अपत्यं पुमान्वैवस्वतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० १२ शुद्धिरस्य अस्तीति तस्मिन् शुद्धिमति। इन्दुश्चन्द्रः। क्षीर-निधिः समुद्रः। चन्द्रः समुद्रे जात इति पौराणिकी गाथा॥

प० १३ व्यूढं विपुलम् उरः वक्षो यस्य सः। उरः प्रभृतिभ्यः कप्। शालोवृक्ष इव प्रांशुः। मूर्त्तिमान्पराक्रम इवस्थितइत्युत्प्रेक्षा।

प० १४ सर्वेभ्यो भूतेभ्योऽतिरिक्तसारेण अधिकबलेन। उर्वी पृथ्वी। अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितोनृपः तस्मादभि-भवत्ये ष सर्वभूतानि तेजसा इति मनुवचनात्सर्वतेजोऽभि-भावित्वम् राज्ञः।

प० १५ प्रज्ञा बुद्धिः। आगमः शास्त्रविद्या। आरम्भः कर्मणः। उदयः फलसिद्धिः।

प० १६ उपजीविनाम्भृत्यानाम्। यादांसि जलजन्तवः। अर्णवः समुद्रः।

प० १७ क्षरणा दभ्यस्ता त्प्रहत्ताच्च वर्त्मनो मार्गात्। न व्यतीयुः नातिक्रान्तवत्यः। नेमिस्तु चक्रधारा स्यात् तस्य वृत्तयः व्यापारा इव वृत्तयो येषां ते।

प० १८ भूत्यर्थं वृद्ध्यर्थम्। वलिः करः। उत्स्रष्टुं दातुम्। प्राग्राजभिः प्रजाभ्यः करमादाय प्रजाःपाल्यन्ते नच निर्धनीक्रियन्ते स्म।

प० १९ अकुण्ठिता अप्रतिहतसामर्थ्या। मौर्वी धनुषो ज्या। आतता आरोपिता। मौर्वीज्याशिञ्जनीगुणः। नीतिपुरःसरमेवास्य शौर्यमितिभावः।

प० २० संवृतः गुप्तः मन्त्रो नीतिविचारो यस्य। इङ्गितं चेष्टितम्।

प० २१ प्राक्तनाः पूर्वजन्मभवाः। सायं चिरं इत्यदिनाट्युल प्रत्ययः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० २२ श्लाघा विकत्थनम् । विपर्ययोऽभावः । अनुबन्धित्वात् सहचारित्वात् । सप्रसवाः सहभुवः । विरुद्धाअपि गुणाः तस्मिन्नविरोधेन स्थिताः इति भावः ।

प० २३ पार दृश्वनोऽन्तं दृष्टवतः । जरसा जरया । जरायाजरसन्य तरस्याम् ।

प० २४ शिक्षारक्षणादिकं तु राजा एव प्रबध्नाति इति सोपि पिता एव ।

प० २५ परिणेता यःविवाहं करोति । प्रसूतये संतानाय ।

प० २६ गां भुवं दुदोह करग्रहेण रिक्तांचकार । मघवा इन्द्रः सस्याय संस्यं वर्धयितुं दिवं स्वर्गलोकं दुदोह । विनिमयः परस्परमादानप्रतिदानम् । दधतुः पुपुषतुः । यथादण्डनीतौ– राजात्वर्थान् समाहृत्य कुर्यादिन्द्र महोत्सवम्, प्रीणितोमेघवाहस्तु महतीं वृष्टि मावहेत् ।

प० २७ परस्वं परधनम् । व्यावृत्ता पराङ्ग खीसती । तस्करता चौर्यम्

प० २८ आर्त्तस्य रोगिणः । उरगेण सर्पेण क्षता दष्टा । तस्य दुष्ट एव शत्रुः शिष्ट एव बन्धुरित्यर्थः ।

प० २९ वेधा स्रष्टा ब्रह्मा । समाधीयतेऽनेनेति समाधिः करणसामग्री महाभूतानां यः समाधि स्तेन विदधे इत्युत्प्रेक्षा । एवं तस्य राज्ञः सर्वे गुणाः परार्थाय रूपरसादिवत् ; कारणगुणाः कार्य गुणं संक्रमन्तीति न्यायात् ।

प० ३० वेलाः समुद्रकूलानि । वप्रवलयाः प्राकारवेष्टनानि । परितः खातं परिखा दुर्गवेष्टनम् । उर्वी पृथ्वी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ३१ दाक्षिण्यं परच्छन्दानुवर्त्तनम् । अध्वरो यागः दक्षिणा याग स्य पत्नी यथा"यज्ञो गन्धर्वः तस्य दक्षिणा अप्सरस इति श्रुतिः

प० ३२ कलत्रवन्तं भार्यावन्तम् । अवरोधो ऽन्तःपुरवर्गः ।

प० ३३ 'आत्मा वै पुत्रनामासि. इति श्रुतिवाक्यादात्मजन्मसमुत्सकः अपरम्, आत्मजन्मा पुत्रः ।

प० ३४ धूर्भारः निचिक्षिपे निहिता ।

प० ३५ पुत्रकाम्यया पुत्रेच्छया । काम्यच्चेति काम्यच् प्रत्ययः । प्र-यतौ पूतौ संस्कारादिना दंपती जायापती ।

प० ३६ तौदंपती एवविशिनष्टि दशभिः । प्रावृषि भवः प्रावृषे रायः वर्षाकालिकः । स्यन्दनो रथः । ऐरावतोऽभ्रमातङ्गः

प० ३७ अनुभावविशेषात्ते जोविशेषात् । भूद् इतिनमाङ्योगे इत्य-डागमाभावः ।

प० ३८ निर्यासो निस्यन्दः पुष्पाणां रेणुनां रजसामु त्किरा विक्षेप-कास्ते । इगुपधेति किरते : कः प्रत्ययः ।

प० ३९ षड्भ्योजातः स्वरः षड्जः स्वरविशेषः तेनसंवदति समा भवति इति सा केका । के मूर्ध्नि कायन्त इति केका मयूरवा-रायः । केका वाणी मयूरस्य । शिखण्डिनो मयूरा स्तैः ।

प० ४० विश्रम्भाद् अदूरं समीप मुज्झितं त्यक्तं वर्त्म मार्गो यैस्तेषु । द्वन्द्वं मिथुनम् । कौतुकवशा द्रथासक्तदृष्टिषु । द्वन्द्व शब्द सामर्थ्या त्सुदक्षिणाक्षिसादृश्यं दिलीपो मृगीषु, दिलीपा-क्षि सादृश्यं च मृगेषु सुदक्षिणे त्येव विवेकः ।

प० ४१ अस्तम्भा माधारस्तम्भरहि ताम् । तोरणंबहिर्द्वारम् । कलनि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्रादैरव्यक्तमधुरशब्दैः सारसैः ।

प० ४१ प्रार्थनासिद्धिं शंसति सूचयति तस्य । तुरगो ऽश्वः अलकाः ललाट रोमावलि र्देव्याः वेष्टनमुष्णीषं च राज्ञः ।

प० ४२ अरविन्दानां कमलानाम् । श्वासोच्छ्वासस्यापि सुगन्धिव त्व मुत्कृष्टपुन्स जातीयत्वम् ।

प० ४४ आत्मना स्वयं विसृष्टेषु दत्तेषु । यज्वा यायजूकः । अमोघाः सफलाः । अर्घः पूजाविधिस्तदर्थं द्रव्यमर्घ्यम् । तस्यानुपद मन्वक् । अर्घ्यस्वीकारानन्तरमित्यर्थः । पादार्घा भ्या श्चेति यत् ।

प० ४५ ह्यस्तनगोदोहोद्भवं घृतं हैयंगवीनम् । हैयंगवीनमिति सञ्ज्ञायां निपातः । घोष आभीरपल्ली । शाखिनो वृक्षाः,

प० ४६ अभिख्या शोभा । हिम कालःशरदृतुः । चित्रा नक्षत्रविशेषः ।

प० ४७ बुबुधे ज्ञातवान् बुधोपेमः विद्वत्प्रतिमः ।

प० ४८ दुष्प्रापमन्येन दुर्लभं यशो यस्य । वाहनो ऽश्वः । महिषीसखो राजा ।

प० ४९ उपावृत्तैःप्रत्यावृत्तैः । समिधश्च कुशांश्च फलानि चाहर्तुं शील मेषांःतैः । आङि ताच्छील्य इत्य तो हरतेरच्प्रत्ययः । दर्शना योग्या श्निभिः प्रत्युङ्गतैरापूर्यमाणम् । प्रोष्यागच्छतामाहिता ग्नीना मग्नयः प्रत्युद्यान्ति इति शास्त्रम

प० ५० आकीर्णं व्याप्तम् । उटजः पर्णशाला भागधेयांऽशः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपनाम भागेभ्यो धेयइतिधेयः प्रत्ययः। नीवारो धान्यवि-
शेषः।

प० ५१ सेकान्ते सेचनावसाने। आलवालमावालमावापः, वृक्षस्य-
परितो जलावापप्रदेशः।

प० ५५ संक्षिप्ताः राशीकृता नीवारा धान्यानि यासु। निषादिभि
रुपविष्टैःवर्तितः वरोमन्थोयत्र सतम्। रोमन्थश्चर्वितचर्व
णम्।

प० ५३ पिशुनः सूचकः। अत्रयावद् आश्रमो विशिष्यते।

प० ५४ यन्ता सारथिः। धुर्या स्तुरङ्गा। धुरोयड्कौ इति यत्।
विश्रामये त्यत्र जनि जृषिति मित्त्वा ह्रस्वत्वेऽपि प्राप्ते
वाचित्तविरागे इत्यतो विकल्पानुवृत्ते स्तदभावः।

प० ५५ सभायां साधवः सभ्याः। सभाया य इति यः प्रत्ययः।
अर्हणा पूजा। अर्हते प्रशस्ताय पूज्यायेत्यर्थः। अर्हः प्रशंसा-
यामिति शतृ प्रत्ययः।

प० ५६ सायंतनस्य सायंभवस्य। सायंचिरमित्यादिना ट्युल्।
अन्वासितं पश्चादुपवेशने नोपसेवितम्। स्वाहया स्वाहा-
देव्या।

प० ५७ प्रतिननन्दतुराशीर्वादादिभिः संभावयाञ्चक्रुः।

प० ५८ अतिथ्यर्थमातिथ्यम्। अतिथेर्यः। तत्क्रियया शान्तो रथक्षो-
भेण जातः परिश्रमो यस्य तम्। राज्याभमन्य मुनी राजा।

प० ५९ अथर्वनिधिरथर्ववेद विज्ञाता ऋषि स्तस्य। अर्थादनपेत-
मथर्यम्। धर्मपथ्यर्थेतियत्। अथर्व निधेरिनेन पुरोहित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्याभिज्ञत्वात् तत्कर्मनिर्वाहकत्वं मुनेरस्तीति सूच्यते

प० ६० उपपन्नं युक्तम् । दुर्भिक्षादयो देव्या आपत्तयः । मानुष्यस्तु चौरभयादयः । उभयत्राऽपि तत आगत इत्यण् टिड् ढाणञि ङीप् अत्राह कामन्दकः-हुताशनो जलं व्याधिः दुर्भिक्षं मरणं तथा इति पञ्चविधं दैवम् । आतुवतकेभ्यश्चौरेभ्यो परेभ्यो राजवल्लभात् पृथिवीपति लाभाच्च नराणां पञ्चधामतम्

प० ६१ मानुषापत्प्रतीकार माह तवेति मन्त्र कृतो मन्त्राणां सृष्टः प्रयोक्तुर्वा । अरयः शत्रवः । मन्त्रैरभिचारं मन्त्रैः प्रत्यादिश्यन्त निरा क्रियन्त । त्वन्मन्त्र सामर्थादेव नः पौरुषमिति भावः

प० ६२ दैवापत्प्रति कारमाह हविरिति-आवर्जितं प्रक्षिप्तम् अव शहो वर्ष प्रतिबन्धे इति । अवेर्ग्रहो वर्षप्रतिबन्ध इत्यच् । तेन विशुष्याता सस्यानाम् । यथाह मनुः वृष्टेरन्नं ततः प्रजाः ।

प० ६३ आयु जीवितकालः परुषस्य वर्षशतम्, शतायुर्वै पुरुष इति श्रुतेः ।

निरातङ्काः निर्भया । निरीतयः निरापदः । ब्रह्मणो वर्चो ब्रह्मवर्चसम् । ब्रह्महस्तिभ्यां वर्चस इत्यच् । अतिवृष्टिरनावृष्टिर्मषिकाः शलभाः शुकाः । अत्यासन्नाश्चराजनः षडेता ईतयः स्मृताः । इति कामन्दकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ६४ ब्रह्मा योनिः कारणं यस्य तेन ब्रह्मपुत्रेण त्वया गुरुणा। सानुबन्धाः सानुस्यूतयो ऽविच्छिन्ना इति यावत्।

प० ६५ वधूः स्नुषा तस्याम्। रत्नानि सूयते इति रत्नसूः। सत्सूद्विष इत्यदिना क्विप्। अवति प्रीणाति। मेदनी पृथिवी। रत्नसूरपी त्यनेन सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यमिति व्यङ्ग्यम्।

प० ६६ वंश्या वंशोद्भवाः पितरः। पिण्डदानं श्राद्धकर्म तस्य विच्छेदं पश्यन्ति ते। स्वधा पितृभोज्यम्। स्वधेत्यव्ययम्।

प० ६७ मत्परम्। अन्यारादि त्यादीना पञ्चमी। आवर्जितं दत्तम्। कवोष्णमीषदुष्णम। कवश्चोष्णे इति कवादेशः। कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वतीत्यमरः।

प० ६८ इज्या यागः। व्रजयजोर्भावे क्यप् इति क्यप्। लोकालोकश्चक्रवालो नामाचलः पर्वतः। प्रकाशते इति प्रकाशश्च देवर्ण विमोचनात्। न प्रकाशत इत्यप्रकाशः पितृणामविमोचनात्। पचाद्यच्। अस्मीति शेषः। लोकालोको प्यन्तः सूर्यसम्पर्काद्बहि स्तमो व्याप्त्या च प्रकाश श्चाप्रकाश श्चेति मन्तव्यम्।

प० ६९ अपत्य प्रयोजनमाह। लोकेति- परत्र परलोके। इह चात्र लोके। शर्मणे सुखाय।

प० ७० दूयसे खिद्यसे। वन्ध्यमफलम्।

प० ७१ अवेहि जानीहि। अन्त्यमृणं पैतृकम। अहन्तदं मर्म स्पृक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरुर्द्विषदिति मुमागमः । अमुक्तस्येतिवत्

प० ७२ इक्ष्वाकुवंश्याः इक्ष्वाकवः । तद्राज त्वादणो लुक् । दुरापे दुःखेन प्राप्ये ।

प० ७३ स्तिमित लोचनः मीलितनयनः ।

प० ७४ प्रणिधानं चित्तैकग्रयम् । स्तम्भः प्रतिबन्धः । भावितात्मा शुद्धान्तः करणः ।

प० ७५ सुरभिः कामधेनुः ।

प० ७६ ऋतुः पुष्पम् तेन हेतुना स्नाताम् ।

प० ७७ प्रसूति रपत्यम् ।

प० ७८ नदति शब्दायमाने ।

प० ७९ सार्गलं सप्रतिबन्धम् ।

प० ८० प्रचेता मुनिः पाताले योगं करोति स्म ।

प० ८१ सपत्नीकः न द्यृतश्चेति कप् । कामदुधा, दुहः कब्घश्चेति कप् ।

प० ८२ अनिन्द्या प्रशस्ता । अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हिलक्षणम् ।

प० ८३ इतस्त्रिभि र्धेनुं विशिनष्टि । आभुग्नं ईषद्वक्रम् ।

प० ८४ कुण्डवदूधोयस्याः सा । ऊधस्तु क्लीवमापीनम् । ऊधसोऽनङ्इत्यनङ् । वत्सदर्शनेन मातुः स्तन्यप्रसवः स्वाभाविकः ।

प० ८५ गात्रमन्तिकादिति दूरान्तिकेति द्वितीया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ८७ कीर्त्तिते सति कथिते सति ।

प० ८८ शश्वत् निरन्तरम् ।

प० ८९ निषण्णाया मुपविष्टायाम् । निषीद उपविश । प्रतिष्ठेथा इत्यत्र समव प्रविस्यः स्थ इत्यात्मनेपदम् ।

प० ९१ स्थेयाः तिष्ठेः । आशीरर्थेलिङ्,एर्लिङिइत्यै कारादेशः ।

प० ९३ प्रदोषे रात्रौ । दोषज्ञो विद्वान् । संवेशाय निद्रायै । स्रष्टु र्ब्रह्मणः सूनुः पुत्रो वसिष्ठः । विशाम्पती राजा ।

प० ९४ संविधा कुशादिशयनसामग्री । आतश्चोपसर्गे इति कः ।

प० ९५ संविष्टः सुप्तः । तस्य गुरोःशिष्याणामध्ययनेनि विदित मवसानं यस्यास्ताम् । निनाय गमयामास ।

इति वशिष्ठाश्रमाभिगमनो नाम प्रथमः सर्गः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नाः ।

१. प्रथम सर्गस्य कथां सरलया गद्य गिरया मिताक्षरै र्निरूपय।

२. दिलीपकाले राजप्रजयोर्व्यवहारं कविपद विन्यासेन सह दर्शय

३. वर्त्तमानेन च संतोलय

४. वसिष्ठाश्रमं मनोहरतया गद्येन पद्यान्तरै र्वा कविभावमवि-
हाय वर्णय।

६. दिलीपस्य आश्रमयात्रां स्वल्पैरक्षरै र्गद्येन पद्यै र्वा दर्शय

७. अपत्यस्य श्रेष्ठत्वनिरूपणे सुभाषितसमन्वितं प्रस्तावं प्रस्तौहि

८. दिलीपस्य तपोवृत्तिं प्रतिपादय।

९. तपश्चर्यामाहात्म्यनिरूपणे प्रस्तावं लिख

१०. वसिष्ठ मृषिमाश्रित्य कस्याप्यन्यस्य ऋषे र्वर्णनं कुरु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयः सर्गः

प० १ जायया प्रतिग्राहिते स्वीकारिते गन्धमाल्ये यया ताम्। पीतं पान मस्यास्तीति पीतः,पीतवान् इति यावत्। अर्शआदिभ्योच्। जायापदसामर्थ्यात् पुत्रजननयोग्यत्वं सूचितम्। जाया भवति यदस्यां जायते पुन,रिति श्रुतेः।

प० २ पांसवो दोषा आसां सन्तीति पासुलाः स्वेरिण्यः, ता न भवन्ति इति अपांसुला, पतिव्रताः स्तासां धुरि अग्रे, कीर्त्तनीया अग्रगणनीया। खुरन्यासेन पवित्रम्। पांसवो धूलयः। तं मार्गम्। गोखुरच्छुण्णमार्ग मनुससारेति भावः।

प० ३ पयोधरी भूतेत्यत्र अभूततद्भावे च्विः। पयोधरी भूता श्चत्वारः समुद्राः यस्यास्ताम्। एतादृशीं गोरूपधरामुर्वीम्। धेनुपक्षे पयसा दुग्धेनाधरीभूताश्चत्वारः समुद्रा यस्या स्ताम्।

प० ४ न्यषेधि निवर्त्तितः। नहि स्वनिर्वाहकस्य परापेक्षा इति भावः।

प० ५ कवलो ग्रासः। दंशा वनमक्षिकाः।

प० ६ निषेदुषीं निषण्णाम् उपविष्टाम्। भाषायां सदवसश्रुवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति क्वसुः। उगितश्चेति ङीप्। आसनबन्धे उपवेशने धीरः।

प० ७ न्यस्तानि परिहृतानि चिन्हानि छत्रचामरादीनि यस्या स्ताम् लक्ष्मीम्। दानराजिःमदरेखा।

प० ८ लतानां वल्लीनां प्रतानैः कुटिलतन्तु भिरूद्ग्रथिता उन्नमय्य ग्रथिताः ये केशास्तैः। इत्थंभूतलक्षणे इति तृतीया। अधिज्य मारोपितमोर्वीकं धनुर्यस्य स। धनुषश्चेति अनङादेशः। अपदेशो व्याजः।

प० ९ पाशभृद् वरुणः। उदीरयामासुः कीर्त्तयाञ्चक्रुः। वयांसि पक्षिणः। आलोकस्य शब्दं वाचकमालोकयेति शब्दम्, जयशब्दमित्यर्थः।

प० १० आरात्समीपे। अवाकिरन् प्रचिक्षिपुः। प्रसूनैः पुष्पैः। आचारार्थैर्लाजैराचारलाजैः। लाज खील इति भाषायाम्। मरुत्सखोऽग्निः। सखा हि सखायमागतमुपचरतीत्यर्थः।

प० ११ विश्रब्धं ददृशुरितिभावः।

प० १२ कीचकाः वेणुविशेषाः। वंशः सुषिर वाद्य विशेषः तत्कृत्यं यथाख्यात्तथा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० १३ पृक्तः संम्पृक्तः । तुषारैः सीकरैः । निर्झरो वारि प्रवाहः ।

प० १४ दवं वनम् । ऊनं दुर्बलं, हरिणादिक मूनबलमिति यावत् ।

प० १५ पतङ्गः सूर्यः पक्षी च । निलयो गृहम् । निलयाय सूर्यपक्षेऽस्तमयाय ।

प० १६ मध्यमलोकः पृथ्वी लोकः । सतां मतेनेत्युभयत्र योजनीयम् । क्तस्यच वर्त्तमाने इतिषष्ठी ।

प० १७ शादाः शष्पाणि येषु देशेषु ते शाद्वला देशाः । श्यामानि भवन्ति श्यामायमानानि । वा क्यषः इत्यात्मनेपदे शानच् । लोहितादिडाज्भ्यःक्यष् इति क्यष् । वर्हाणि पक्षभारा एषां सन्ती ति वर्हिणो मयूराः । वराहः शूकरः

प० १८ आपीनमूधः । गृष्टिः सकृत्प्रसूता गौः । अश्वितास्यां चारुभ्याम् । तपोवना दावृत्तेः पन्थास्तम् । ऋक्पूरब्धूः पथामानक्ष इति समासान्तो ऽप्रत्ययः ।

प० १९ वनिता स्त्री सुदक्षिणा । निमेषे निमीलने अलसा मन्दा पंक्तिर्यस्याः, निर्निमेषा इत्यर्थः । उपवासो भोजननिवृतिस्तद्वद्भ्यामिव उपोषिताभ्याम् । यथो पोषितो जलमधिकं पिबति तथैवेयं तृष्णया ऽधिकं व्यलोकयत् ।

प० २० तयोरन्तराले तदन्तरे । क्षपा रात्रिः ।

प० २१ अक्षतानां पात्रेण सह वर्त्तमानौ हस्तौ यस्याः सा । आनर्च अर्चयामास । अर्चते भौवादि काल्लट् ।

प० २२ सपर्या पूजा । स्तिमिता निश्चला ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० २३ दारैररुन्धत्या सह वर्तमानस्य वसिष्ठस्य ।

प० २४ अन्तिके समीपे न्यस्ता बलय उपायनानि प्रदीपा वर्तयश्च पूजार्थं यस्या स्ताम् । ताम् अनू दतिष्ठत् कर्मप्रवचनीययुक्ते द्वितीया ।

प० २५ सप्तत्रिगुण एक विंशतिः । महिषी राज्ञी ।

प० २६ अन्येद्यु' द्वाविंशे दिने । सद्य परुत्परारि इत्यादिनिपातः जिज्ञासमाना, ज्ञाश्रुस्मृ दशांसनः इत्या त्ममे पदे शानच् ।

प० २७ अद्रिशोभायां प्रहिते इक्षिरो येन तेन अलक्षितो ऽभ्यु त्पतन उत्क्रमो यस्य सः । किलेत्य लीके ।

प० २८ आर्तेषु दुःखितेषु,साधोर्हित कारिणः ।

प० २९ पाटला गौररुणवर्णा तस्यां तस्थिवासं स्थितम् । उपत्यकाऽद्रे रासन्नाभूरूर्ध्वमधित्यका । सानुमान् पर्वतः । प्रफुल्लम् विकसितम् । उपाधिभ्यां त्यकन्नासन्नारूढयो रिति त्यकन् । लोध्राख्यो वृक्षः ।

प० ३० जाताभिषङ्गः जातपरभवः । निषङ्गस्तू णीरः । प्रसभेन व लाद् उद्धृता अरयो येन स । तूणोपासङ्गतूरिणीरनिषङ्गा इषुधिर्द्वयोः ।

प० ३१ कङ्कः काकइति वाचस्पत्यम्, गृध्र इतिकेचित्, कर्कटइति यादवः,तस्य पत्राणि । नखप्रभया भूषितानि कङ्कपत्राणि यस्य तस्मिन् सायकपुंखे कर्तर्यख्ये बाणमूले । आरम्भ उद्योगः

प० ३२ अभ्यर्णमन्तिकम् । आगस्कृतम् अपराधकारिणम् । भोगी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्पः ।

प० ३३ आर्याणां सतां गृह्यं पद्यं पादास्वेरिवाह्यपद्येषुचेतिक्यप् ।

प० ३४ इतोऽत्र । सविभक्तिकस्तसिः । रंहो वेगः । शिलोच्चये पर्वते । न मूर्छति न प्रसरति ।

प० ३५ चामीकरंच शुभ्रञ्च गौर माहु र्मनीषिणः । किंकरोभृत्यः । अष्टमूर्त्तिः शंकरः । पृथिवी सलिलंतेजो वायुराकाशमेवच सूर्याचन्द्रमसौ सोमयाजी चेत्यष्टमूर्त्तयः ।

प० ३६ स्कन्दस्य माता गौरी तस्या हेम्नः सुवर्णस्य कुम्भः कलश एव स्तनः । स्कन्दपक्षे हेमकुम्भ इव स्तन इति विग्रहः ।

प० ३७ कटः कपोलः । सेनां नयति सेनानी तं सेनान्यम् कुमारं स्कन्दम् ।

प० ३८ व्यापारितः नियुक्तः । शुलभृत शंकरेण । अङ्कं समीप मागताः सत्वानि प्राणिनो वृत्ति राहारोयस्मिन्स्तत्सिंह त्वम् ।

प० ३९ शोणितपारणा रुधिरस्य व्रतान्तभोजनरूपा ।

प० ४० क्षिणोति हिनस्ति । अशक्यार्थेष्वप्रति विधानं न दोषाये तिभावः ।

प० ४१ प्रत्याहितास्त्रः । कुण्ठितास्त्रः गिरिशःशिवः । शक्यभावादात्मनि पराभवं न गणयामास । समानेषु क्षत्रियाणां मभिमानो न सर्वेश्वरं प्रति इति भावः ।

प० ४२ त्र्यम्बकः शंकरः । वज्रपाणि रिन्द्रः । तत्पूर्वभङ्गे इषुप्रयोगे । बाहुं सवज्रं शक्रस्य कुद्धस्यास्तम्भयत्प्रभुः ''
इति महाभारतम् ।

प० ४४ तरुशैलवृक्षादयः स्थावराः । मनुष्य पशुपक्ष्यादयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गमाः । तेषां सर्गस्य उत्पादनस्य, स्थिते भरणपोषणादेः प्रत्यवहारस्य नाशस्यच हेतुःकारणम् । जन्माद्य स्य यतः इतिवेदान्तः ।

प० ४५ मद्देहेन शरीरवृत्तिं कुरु धनुश्च मुञ्चे तिभावः ।

प० ४६ अल्पस्य हेतो रल्पफलाये त्यर्थः । षष्ठी हेतु प्रयोगे इति षष्ठी । हातुं त्यक्तुम् । विचारे कार्याकार्यविमर्शे मुढो मूर्खः ।

प० ४८ भूतानुकम्पा भूतदया । स्वस्ति क्षेम अस्या अस्तिइति स्वस्ति मती जीवेदि त्यर्थः । उपप्लवेभ्यः उपद्रवेभ्यः ।

प० ४९ कृशान् प्रतिमाद् वन्हिसदृशा । मन्युः क्रोधः । स्पर्शयता प्रतिपादयता ददता । विश्राणनं वितरणं स्पर्शनं प्रति पाद नम् । विनेतुमपनेतुम् ।

प० ५० इन्द्र संबन्धि ऐन्द्रम् पदम् । आत्मरक्षां विदधतस्तवस्वर्ग पद मपिलभ्यते इति भावः । उर्जस्वलमित्यत्र ज्योत्स्ना तमि स्रा इत्यादिना वलच् ।

प० ५१ प्रतिस्वनः प्रतिध्वनिः । भाषिरयं ब्रुविसमानार्थो द्विकर्मकः ।

प० ५२ तेन सिंहेन यदध्यासितं व्याक्रमणं तेन कातरे अक्षिणी यस्याः तया । बहुव्रीहौ सख्याद्गोः स्वाङ्गात्षच् इतिषच् षित्वा न्ङीप् । सुतरामित्यत्र द्विवचन विभज्येत्यतः सुशब्दात्तरप् । किमेत्याङ्व्ययेति आम्प्रत्ययः, तद्धितश्चेत यव्ययं संज्ञा ।

प० ५३ उदग्र उन्नतः । क्षतान्नाशात । उपक्रोशो निन्दा तया मलीमसैर्मलिनै, प्राणैःकिम् ।

प० ५४ अनुनयः क्रोधापनयनम् । विश्राणनाद्दानात् । पयस्विनी गौः । अनूना अन्यूना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ५५ निष्क्रयः प्रत्याहरणाय देयं विनिमययोग्यं देयंवस्तु । प्रतिशीर्षकम् । एरच् इत्यच् । न्यायादनपेता न्याय्या धर्मपथ्यर्थेति यत् । स्वप्राणव्ययेनापि गुरुधनं रक्ष्यमिति भावः ।

प० ५६ स्वय मक्षतेन अव्रणेन नियुक्तेन रक्ष्यं वस्तु विनाश्य नियोक्तःस्वामिनः अग्रेस्थातुं न शक्यम् । भृत्यस्य इदं लज्जाकरमिति भावः ।

प० ५८ भूतनाथः शिवः तस्य अनुजः अनुचरः । अनुगच्छतीतिअनुगः । प्रणयः प्रेम याञ्चा च ।

प० ५९ प्रतिष्टम्भाद्विमुक्तो वाहुर्यस्य स । स्तम्भेरिति रूस्य षत्वम् । सद्यः तत्क्षणे । न्यस्तशस्त्रः परित्यक्तास्त्रः । आमिषस्य मांसस्य । उपानयत् समर्पितवान् । हरये सिंहाय ।

प० ६० उत्पश्यतः उत्प्रेक्षमाणस्य । उग्रम् भयानकम् । विद्याधरा देवयोनिविशेषाः तेषां हस्तैः मुक्ता पुष्पवृष्टिः पपात ।

प० ६१ निशम्य श्रुत्वा । प्रस्रविणीं दुग्धं निश्च्योतयन्तीम् । अमृतायमानं । उपमानादाचार इतिक्यच् ।

प० ६३ उद्भाव्य कल्पयित्वा । अन्तको यमः । हिंस्राः घातकाः श्वापदाः ।

प० ६४ पयसां दुग्धानां प्रसूतिं कारणं, दात्री मिति अर्थः ।

प० ६५ समानीय संधाय । अतएव रघुकुल मिति प्रसिद्धिः ।

प० ६६ प्रतिश्रुत्य प्रतिज्ञाय ।

प० ६७ औधस्यम् ऊधसि भवम् क्षीरम् । शरीरावयवाद्येतियत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ६८ हैमवताद्धिमवत्सम्बन्धिनः कुक्षेर्गुहायाः ।

प० ६९ कथितस्य कथनं पुनरुक्तिः । चिन्हैरेव कथितत्वात्पुनरुक्त येव स्थितया इत्युत्प्रेक्षा ।

प० ७० प्रास्थानिकं प्रस्थान काले भवम् । कालाट्ठञ् इतिठञ् । स्वस्ति ईयते प्राप्यते अनेनेति स्वस्त्ययनं शुभावह माशीर्वादं प्रयुज्य, वसिष्ठ इति सम्बन्धः ।

प० ७१ प्रगतो दक्षिणं प्रदक्षिणम् तिष्ठद्र प्रभतीनि क्षेत्यव्ययी भावः । ततश्च्वः । सद्भिः मङ्गलैः प्रदक्षिणादिभि रुग्रतर प्रभावः सन् प्रतस्थे। प्रदक्षिणाकरणं प्रायशः प्रयाण काले सतां समुदाचारः ।

प० ७२ अनुद्धतः पाषाणादिप्रतिघातरहितो रथ स्तेन ।

प० ७३ कर्शितं कृशी कृतम् । औषधीनां नाथश्चन्द्रस्तम । 'तं चसोमं ययुर्देवा पर्यायेणानुपूर्व्यश', इति व्यासः ।

प० ७४ पुरंदरः शक्रः पूःसर्वयोर्दारिसहोरिति खच् । मुमागमो निपातः ।

प० ७५ अत्रिनयनाच्चन्द्रः समुद्भूतः इतिपौराणिकी गाथा । महादेवस्य तेजःशुक्र मग्निना गङ्गायां निक्षिप्तमि ति रामाण-यणीयमुपाख्यानम् ॥ लोकपालानाम् दिक्पालाना मनु-भावैस्तेजोभिरभिनिविष्टं अनुप्रविष्टं गर्भमाधत्त । अष्टा-नां लोकपालाना वपुर्धारयते नृप इतिमनुः । मालिनी वृतम् ।

इति नन्दिनीवरप्रदानो नाम द्वितीयः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नाः

(१) कविवर्णनानुसारं गद्येन निजपद्यैर्वा दिलीपस्य धेनु परिचर्यां मनोहरतया वर्णय ।

(२) वसिष्ठधेनोः कामधेनुत्वं विस्पष्टय ।

(३) मातृभूमेः मातृ धेनोश्च तुलनायां रोचकं निबन्धं निबधान, वर्तमानकाले च उभयोर्मात्रोः का दशा इति हृदयंगमैर्वचोभिर्निरूपय ।

(४) गुरुभक्ति माश्रित्य कविपदान्युद्धृत्य प्रस्तावं लिख ।

(५) धेनोर्मायां वर्णय ।

(६) सिंहदिलीपयोरालापं गद्यैः पद्यै रुचिरतया लिपीकुरु ।

(७) एतादृश एवान्य आलापः कयोश्चिन् निबन्धनीयः ।

(८) भक्तिफलं ब्रूहि ।

(९) राज्ञः प्रत्यागमनं मितात्तरैर्वद ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः सर्गः

प० १ अथ गर्भधारणानन्तरम् सखीजनस्य उद्वीक्षणानां दृष्टीनां कौमुदीमुखम् चन्द्रिकाप्रादुर्भवम्। यद्वाकौमुदी नाम दीपोत्सवतिथिः। यथाभविष्ये"कौ मोदन्ते जनाः यस्यां तेनासौ-कौमुदी मता"। तस्या मुखं प्रारम्भम्। दौहृदलक्षणम् गर्भचिन्हम्। सुदक्षिणा दधौ। अस्मिन्सर्गे वंशस्थं वृत्तम्। निदानं मूलकारणम्

प० २ शची इन्द्राणी। समये दशमे मासीत्यर्थः। उच्चसंश्रयै रुच्चसंस्थैस्तुङ्गस्थानगैरसूर्यगैरनस्तमितैः। कैश्चिद्यथा सम्भवं पञ्चभिर्ग्रहै सूचिता भाग्यसम्पद् यस्य तं। सूर्य प्रत्यासत्तिर्ग्रहाणामस्तमयो नाम। त्रीणि प्रभावमन्त्रोत्साहात्मकानि साधनान्युत्पादकानि यस्या सा त्रिसाधाना। "शक्तयस्तिस्रः प्रभावो त्साहमन्त्रजाः।

प० ३ मंगलमाह दिशइति—प्रसेदुः प्रसन्ना वभूवुः। सुखा मनोहराः शुभशंसि शुभसूचकम्। भवः जन्म।

प० ४ अरिष्टं सूतिकागृहम् तस्मिन् या शय्या तां परितः विसारिणा प्रसरण शीलेन तेजसा। हतात्विट् कान्तिर्येषाम् तादृशाः-आलेख्य समर्पिता चित्रापिता इव वभूवुर्दीपाः।

प० ५ शुद्धान्तचराय अन्तःपुरचारिणे। त्रयस्याप्यत्र राज्ञः प्रधानाङ्गत्वात्।

प० ६ निवाते वातरहितप्रदेशे यत्पद्मं तद्वत्स्तिमितेन चक्षुषा। न प्रवभूव स्थातुं शशाक।

प० ७ आकरोद्भवः खनिप्रभवः। जातस्य पुत्रस्य कर्म संस्कारादयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ८ सुखः सुखकरं श्रवः श्रवणंयेषां ते। निस्वना ध्वनयः। तूर्यः वाद्यविशेषः। सद्मनिगृहे। दिवौकसो देवाः। पृषोदरादित्वात्साधुः।

प० ९ संयतः बद्धः।

प० १० अर्भकः बालः। लंधिवंह्यो र्नलोपश्चेत्यप्रत्ययः, बालमूलघ्वङ्गलीनां वा लोरत्वमापद्यते इति रेफे वैकल्पिके रवरिति रूपंसिद्धम्।

प० ११ हरिदश्वदीधितिः सूर्यस्य रश्मिः। दिने दिने नित्यवीप्सयो रितिद्विर्वचनम्।

प० १२ उमा पार्वती। वृषाङ्कः शिवः। शरजन्मा कार्त्तिकेयः।

प० १३ रथाङ्गनामा चक्रवाकः। पर्यचीयत ववृधे।

प० १४ ततान चक्रे। पोतः पाकोऽर्भकोडिम्भः पृथुकः शावकः शिशुः।

प० १५ निषिञ्चन्तं वर्षन्तम्। रसः स्वादः।

प० १६ परार्ध्यमुत्कृष्टं जन्म यस्य तेन।

प० १७ तृतीये वर्षे वृत्तः निष्पन्नश्चूलश्चूडाकर्म यस्य। सवयोभिः वयस्यैः।

प० १८ उपनीतम् उपनयेन संस्कारेण संस्कृतम्। विनिन्युः शिक्षयामासुः। अवन्ध्ययत्ना सफलप्रयत्नाः। वस्तुनि उचितेपात्रे उपहिता नियुक्ता। क्रियाहिद्रव्यं विनयति नाद्रव्यम् इति कौटिल्यः।

प० २० रौरवीं रुरुसम्बन्धिनीं त्वचम् रुरुः कृष्णमृगः। पितुरिति-आख्यातोपयोग इत्युपादानात्पञ्चमी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० २१ तमोनुद्भानुः सूर्यः । गावः लोमानि केशांश्च दीयन्ते खण्ड्यन्ते चास्मिन्निति गोदानविधिः केशान्तं कर्म ब्राह्मणादीनां शोडषादिषु वर्षेषु विधीयते । निरवर्त्तयत्कृतवान् ।

प० २३ युगो नामधुर्यस्कन्धगः सच्छिद्रप्रान्तो यानाङ्गभूतोदारुविशेषः जुआइति भाषायाम् । तद्वदायतौबाहू यस्य स । अंसलो बलवान् ।

प० २४ नितान्तगुर्वी घोतोगुणवचनादितिङीष् । लघुंकरिष्यता लघयिष्यता । निसर्गेण प्रकृत्या संस्कारेण शिक्षादिना च विनीतः शिक्षितः । युवराजशब्दंभजतीति भजोण्विरितिण्विः । द्विविधोविनयः स्वाभाविकः कृत्रिमश्चेति कौटिल्यः ।

प० २५ नरेन्द्रएवमूलस्थानं प्रधानस्थानं तस्मात् । अनन्तरं सन्निहितम् । तस्या आत्मन आस्पदं स्थानम् ।

प० २६ विभावसुरग्निः । घनव्यपायेन शरत्समयेन । गभस्तिमान् सूर्यः । गण्डः कटस्तस्य प्रभेदः स्फोटः तेन । करी हस्ती ।

प० २७ एकेन अपूर्णं शतम् एकोनशतम्, ९९, ॥ अपगतं विघ्नं यथा तथा ।

प० २८ गूढविग्रहः अप्रकटितरूपः । मखाय यज्ञाय । अनर्गलमप्रतिबन्धम् ।

प० २९ विषादेन खेदेन लुप्ता नष्टा प्रतिपत्तिः कर्तव्याकर्त्तव्यज्ञानं यस्य तत् । नन्दिनी वसिष्ठस्य गौः ।

प० ३० अङ्गनिस्यन्दजलमूत्रम् । निस्यन्दो द्रवः । प्रमृज्य शोधयित्वा । इन्द्रियादतिक्रान्तेषु अतीन्द्रियेषु भावेषु । उपपन्नदर्शनः समुत्पन्नसाक्षात्कारशक्तिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ३१ पर्वतस्य पक्षान् शातयति स इन्द्रस्तम्। किरणप्रग्रहौ रश्मी।

प० ३२ हरेरिन्द्रस्य अनिमेषवृत्तीनि शतानि चक्षूंषि इति पुराण मतम्। हरिभिर्हरितैः वाजिभिस्तुरङ्गैः।

प० ३३ अजस्रं सततं दीक्षायां यागकर्मणि प्रयतस्य प्रवृत्तस्य। क्रियाविघातायेति तुमर्थाच्चभाववचनादिति तुमर्थे चतुर्थी। क्रियां विहन्तु मित्यर्थः।

प० ३४ अन्तरायो विघ्नः। च्युतः क्षतः।

प० ३५ प्रतिमोक्तुम्। मलीमसां मलिनां दोषयुक्ताम्। पद्धतिः मार्गः।

प० ३६ दिवौकसामधिपतिः देवानां राजा, इन्द्रः।

प० ३७ आत्थ ब्रवीषि।

प० ३८ त्र्यम्बकः शिवः।
प० ३९ कपिलाजुकारिणा कपिलतुल्येन मया। मा निधा मानि धेहि। नमाङ्योगे इत्यडागमा भावः।

प० ४० अपगतं भयं यस्य स। सर्गो निश्चयः। कृती कृतकृत्यः। इष्टादिभ्यश्चे त्यादिना इनिः।

प० ४१ आलीढाख्यं धनुर्व्यापारे स्थितिविशेषः। तेन विशेषं शोभते यः तेन वपुषः शरीरस्य प्रकर्षेण उन्नत्या विडम्बितः अनुसृतः ईश्वरः पिनाकी येन सः।

प० ४२ अवष्टम्भः स्तम्भस्तन्मयेन तदाकारेण। नवाम्बुदानामनीकस्य समूहस्य मूहूर्त्तं क्षणमात्रं लाञ्छने चिन्हभूते धनुषि। सायकम् वाणं समधत्त संहितवान्।

प० ४३ आशु शीघ्रं गच्छति इति वाणः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ४४ सुरद्विपस्य ऐरावतस्य आस्फालने परिमार्जने कर्कशा अङ्गुलयो यस्य स तस्मिन् ।

प० ४५ महान्तमशनिरूपं ध्वजम् । केशानां व्यपरोपणादवतरणाच्छेदनाद् । तस्मैभृशं चुक्रोषेतिक्रुधद्रह इत्यादिना सम्प्रदानाच्चतुर्थी ।

प० ४६ गरुत्मन्तः ये आशीविशा भुजङ्गाः तइव भीदर्शना भयंकराः तैः । पत्रिभिः वाणैः । तयोरिन्द्ररध्वो रुपान्ते समीपे स्थिताः सिद्धानां देवानां सैनिका यस्मिन् तत् । तुमुलं संकुलं युद्धम् ।

प० ४८ प्रकोष्ठो मणिबन्ध स्तस्मिन् प्रमथ्यमानो ऽर्णव इव गम्भीरं नदति सा तम् । अर्णवः समुद्रः । शशाङ्कः श्चन्द्रः तस्य अर्द्धं खण्डमिव मुखं यस्य तेन ।

प० ४९ महीध्राः पर्वता स्तेषां पक्षानां व्यपरोपणे कर्त्तने उचितं समर्थं मस्त्रम् ।

प० ५१ वृत्रहा इन्द्रः । ब्रह्मभ्रूणवृत्रे किप । गुणाः शत्रूनप्याव र्जयन्तीतिभावः ।

प० ५२ असङ्गम् अप्रतिबन्धम् । सारंवलं तद्वत्तया ।

प० ५३ प्रियं वदतीति प्रियं वदः प्रियवशे वदःखच् । अरुर्द्विषे त्यादिना मुम् ।

प० ५४ सदो गृहम् गतः त्रिलोचनस्य हरस्यैकांशतया अन्यतर मूर्त्तित्वादतएव दुरासदः दुःसहः । विशांपती राजा ।

प० ५५ मातलिरिति इन्द्रस्यसारथे र्नाम सोस्यअस्तीति स इन्द्रः । नातिप्रमना विजय लाभे अपि तुरगालाभान्नाति तुष्टः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प० ५६ कुलिशस्य वज्रस्य व्रणेन क्षतेनाङ्कितम् ।

प० ५७ सूनवे पुत्राय । ककुदः श्रेष्ठः । यूने युवकाय । आतपवारणम् छत्रम् । इत्यनेन देव्या सह वानप्रस्थ उक्तः । इदं वनगमनं कुलव्रतम् । सुतविन्यस्तपत्नीकः तया वानुगते वने वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेद् " । इतियाज्ञवल्क्यः-हरिणी वृत्तम् ।

इति रघुराज्याभिषेको नाम तृतीयः सर्गः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नाः

१. रघोर्बाल्यं कालं विशदय ।

२. विद्याभ्यासब्रह्मचर्यकालंच कविपदोद्धरणपुरःसरं प्रमाणय ।

३. दिलीपस्य यज्ञं वर्णयन्शतक्रतुना सह युद्धं गद्येन पद्यैर्वा वर्णय ।

४. वर्त्तमानगुरुकुलाश्रम माश्रित्य प्रस्तौहि ।

५. कविवर्णितं युद्धप्रकारं मनसि संस्थाप्य किञ्चिदन्य युद्धं च तुलितै र्गद्यैः पद्यैर्वा दर्शय ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल ग्रन्थावलिः।

अद्यश्वस्सर्वत्रैव बालोपयोगिनां लघुपुस्तकानामपेक्षाऽनुभूयते, तामेवापेक्षां पूरयितुं बालोपयोगीनि पुस्तकानि स्थूलाक्षरैरुत्तमपत्रेषु गुरुकुलेन प्रकाश्यन्ते। इमानि पुस्तकानि सर्वेषु विद्यालयेषु संस्कृते प्रवेशमिच्छतां विद्यार्थिनां हस्तेषु निश्शङ्कं दातुं शक्यन्ते।

साहित्य ग्रन्थमाला।

१. संस्कृतप्रवेशिका (संस्कृते प्रवेशमिच्छतां बालानामन्येषाञ्चा प्युपकारिका ... ... मू० ।)
२. संस्कृत प्रथमपुस्तकम् यन्त्रस्थाः
३. संस्कृत साहित्य पाठावलिः द्वितीयो भागः यंत्रस्थाः
५. आर्य्यसूक्तिसुधा ... ... ।)
६. काव्यलतिका (अत्र भारविमाघादीनां छात्रोपयोगिनः सर्गाः संगृहीताः) ... ... ।।।)
७. संक्षिप्त-वैदिक—मनुस्मृति—श्री म० मुन्शीराम जी गवर्नर गुरुकुल, द्वारा संगृहीत तथा सम्पादित मूल्य ।।)
८. संशोधित पंचतन्त्रम् १म भागः तन्त्रद्वयम् ।।।)
९. संशोधित पंचतन्त्रम् २य भागः शेषं तंत्रत्रयम् ।।=)
१०. संशोधत हितोपदेशः ।=)।

व्याकरण ग्रन्थमाला

१. महाभाष्यम्—अङ्गाधिकारः—श्रीमता—पतञ्जलिमुनिना प्रणीतम्। महामहोपाध्याय श्रीकैय्यटरचितप्रदीपेन समुल्लसितम्। २।।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. धातुपाठ मूल महर्षिपाणिनि कृत ..... ।)
३ अष्टाध्यायी, सरल संस्कृत टीका सहित (पूर्वार्द्धम्) २)
४ अष्टाध्यायी, सरल संस्कृत टीका सहित (उत्तरार्द्धम्) १॥)
५ अष्टाध्यायी—मूल ..... ।)॥
६ नामिक ..... =)॥
७ आख्यातिक ..... ॥।)

आर्य्यभाषा ग्रन्थमाला ।

१. आर्य्य भाषा पाठावली प्रथम भाग ... ।)
२. आर्य्य भाषा पाठावली द्वितीय भाग ।=)
३. विज्ञानप्रवेशका-भौतिकी-श्री गोवर्धन जी बी. ए. मुख्याध्यापक गुरुकुल विद्यालय, का किया हुआ वैलफोर स्टूआर्ट कृत "फ़िज़िक्स प्राइमर" का अनुवाद ॥)
४. विज्ञान प्रवेशिका–रसायन–श्री गोवर्धन जी बी. ए. मुख्याध्यापक गुरुकुल विद्यालय का किया हुआ विलियम एस. फर्नो की प्रसिद्ध कैमिस्ट्री का आर्य्य-भाषा में अनुवाद ॥।)
५. भारतवर्ष का इतिहास, प्रथम भाग-श्री उपाध्याय रामदेव बी. ए. एम. आर. ए. एस. कृत १।)

पुस्तक मिलने का पता—

मुख्याधिष्ठाता,

गुरुकुल विश्वविद्यालय काङ्गड़ी डाकख़ाना शामपुर जि० बिजनौर

---

१०) से २०) रु० तक के पुस्तक लेने वालों को १०) रु० सैकड़ा तथा इस से अधिक लेने वालों को १५) रु० सैकड़ा कमीशन दिया जावेगा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. धातुपाठ मूल महर्षिपाणिनि कृत.....
३ अष्टाध्यायी, सरल संस्कृत टीका सहित (पूर्वार्द्धम्)
४ अष्टाध्यायी, सरल संस्कृत टीका सहित (उत्तरार्द्धम्)।
५ अष्टाध्यायी—मूल.....
६ नामिक .....
७ आख्यातिक.....

आर्य्यभाषा ग्रन्थमाला।

१. आर्य्य भाषा पाठावली प्रथम भाग ...
२. आर्य्य भाषा पाठावली द्वितीय भाग
३. विज्ञानप्रवेशका-भौतिकी-श्री गोवर्धन जी बी. ए. मुख्याध्यापक गुरुकुल विद्यालय, का किया हुआ वैलफोर स्टूआर्ट कृत "फ़िज़िक्स प्राइमर" का अनुवाद
४. विज्ञान प्रवेशिका—रसायन—श्री गोवर्धन जी बी. ए. मुख्याध्यापक गुरुकुल विद्यालय का किया हुआ विलियम एस. फर्नो की प्रसिद्ध कैमिस्ट्री का आर्य्य-भाषा में अनुवाद ।।।
५. भारतवर्ष का इतिहास, प्रथम भाग-श्री उपाध्याय रामदेव बी. ए. एम. आर. ए. एस. कृत १।)

पुस्तक मिलने का पता—

मुख्याधिष्ठाता,

गुरुकुल विश्वविद्यालय काङ्गड़ी डाकख़ाना शामपुर जि० बिजनौर

---

१०) से २०) रु० तक के पुस्तक लेने वालों को १०) रु० सैकड़ा तथा इस से अधिक लेने वालों को १५) रु० सैकड़ा कमीशन दिया जावेगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar